International Referred Research Journal, January, 2012, ISSN- 0975-3486, RNI : RAJBIL 2009/30097, VOL- III * ISSUE 28

शोध पत्र- संस्कृत

January 2012

# महाकविमाघस्य राजनीतिबोधस्य साम्प्रतिक्या राजनीत्या मूल्याङ्कनम्

* डॉ. यादरामः मीना

* संस्कृत विभागः, जयनारायणव्यासविश्वविद्यालयः, जोधपुरम्

भारतवर्षस्य इतिहासोपरि यदा वयं दृष्टिपातं कुर्मः तदा प्राप्तुमः यत् भारतीयराजानः क्षात्र–शक्तिषु सम्पत्तिषु च वैदेशिकानां राज्ञामपेक्षया कदापि न्यूनाः नासन् तथापि तस्मिन् समये भारतीयराज्ञां प्रजानां च राजनीतिज्ञानं साम्प्रतिकानां नेतृणां लोकानां च इव अत्यन्तं संकुचितं सकीर्णं च आसीत्।

फलतः आक्रमणकारीणामाक्रमणं रोद्धुं ते संघटनस्य आवश्यकतामपि नानुभूतवन्तः।यदा भारते सार्वभौमराज्ञां शासनमभविष्यत्, तदा भारतस्योपरि कस्यापि वैदेशिकराज्ञः आक्रमणं कदापि नाभविष्यत्। मौर्यसाम्राज्यस्य गुप्तसाम्राज्यस्य च आन्तिमोत्कर्षपर्यन्तं विदेशीयाक्रमणेन भारतवर्षं क्षतिं नाप्नुवत्। पुनः मुगलसाम्राज्यस्याभ्युदयकाले ब्रिटिशसाम्राज्यस्य चाभ्युदयकालेऽपि भारतवर्षस्योपरि वैदेशिकमाक्रमणं नाभवत्। शिशुपालवधमहाकाव्यस्य द्वितीयसर्गे महाकविमाघः राजनीत्याः आलोचनां विस्तरेण कृतवान्। महाभारतस्य सभापर्वतः एर्ष विषयः स्वीकृतोऽस्ति। महाराजयुधिष्ठिरः राजसूययज्ञं कर्तुमिच्छति। अयं यज्ञः निर्विघ्नं समाप्तो भवेदित्यस्य कृते सः दूतं सः श्रीकृष्णम् इन्द्रप्रस्थमामन्त्रयति। यः सम्राट् एव राजसूययज्ञं कर्तुं शक्नोति। सम्राट् स एव भवितुं शक्नोति यस्मै सर्वे राजानः करं दत्त्वा तस्याधीनतां च स्वीकुर्वन्ति। राजसूययज्ञस्य अर्थ एवासीत् यत् सम्राट् सर्वान् राज्ञः अनेन यज्ञेन स्वाधीनतायाः अनुभवं कारयति स्म। एकः समयः आसीत् यदा भारतजनानामुच्चादर्श आसीत् 'सम्राट्' इति पदस्य प्राप्तिः। वेदस्य कर्मकाण्डे अस्याः उच्चकांक्षायाः सर्वप्रथमा उद्घोषणाऽभवत्। 'सम्राट्' इत्यस्य प्राप्तिः एकं सहजं कार्यं नासीत्। सभापर्वणः 15 तमे अध्याये युधिष्ठिरः स्वयमेव उक्तवान् यत् 'सम्राट्' शब्दो हि कृच्छ्रभाक्।' माघसमये अस्याः उच्चाकांक्षायाः प्राप्तिः भारतीयजनेषु आसीत्, किन्तु सम्प्रति भारतीयाः प्रत्येकं क्षेत्रेषु परमुखापेक्षिणो भूत्वाऽपि अपमानस्य अनुभवं कुर्वन्ति।

युधिस्ष्ठरस्य निमन्त्रणं प्राप्य श्रीकृष्णः यदुवंशीनां प्रधानामात्यः उद्धवश्च राजसूययज्ञे युधिस्ठिरस्य सहायतां कर्तुमिन्द्रप्रस्थं गन्तुमिच्छतः, किन्तु श्रीकृष्णस्य अग्रजः बलरामः तस्य च अनुयायिनः इन्द्रप्रस्थ न गन्तुमिच्छन्ति। श्रीबलरामः चेदिराजशिशुपालस्योपरि आक्रमणस्य परामर्शं ददाति। श्रीकृष्णः अग्रजस्य इच्छायाः अवहेलनामपि न कर्तुमिच्छति पनुः इन्द्रप्रस्थमपि गन्तुमिच्छति। एवं प्रकारेण किंकर्तव्यविमूढभावेन सः द्वारकायां गुप्तमन्त्रणां कृतवान्। अस्यां सभायाः त्रयः जनाः एव उपस्थिताः अभवन्–बलरामः, श्रीकृष्णः उद्धवश्च। शिशुपालवधस्य द्वितीयसर्गे अस्याः मन्त्रणासभायाः यत् विवरणं महाविमाघेन प्रस्तुतं तत् कवेः एव कल्पना। महाभारते इदं विशेषरूपेण न आलोचितम्। मन्त्रणासभायां मन्त्रणाकार्यस्य आरम्भं कर्तुं श्रीकृष्णः सर्वप्रथममुक्तवान्–यतः महाराजयुधिष्ठिरः स्वभ्रातृभ्यः पराक्रमेण सर्वान् राज्ञः स्वकरदान् कृतवान्–''करदीकृतभूपालो भ्रातृभिर्जित्वरैर्दिशाम्।'' अतः युधिष्ठिरस्य राजसूययज्ञे यदि वयं न गमिष्यामः तदापि सः स्वराजसूययज्ञं निर्विघ्नं पूर्णं करिष्यति। यदि वयं राजसूययज्ञे सम्मिलिताः भवामः, तदा यज्ञानन्तरं चेदिराजशिशुपालस्योपरि आक्रमणं कर्तुं न शक्नयामः। तस्योपरि आक्रमणमपि आवश्यकं यतः दुर्विनीतः शिशुपालस्य शक्तिः वर्धमाना अस्ति। कस्यापि नीतिज्ञविजिगीषुनृपस्य कृते शत्रोः शक्तेः वृदध्युपेक्षयाः विषयः न भवितं शक्नोति। वर्धमानः शत्रुः रोगश्च समानः एतेषु कस्यापि उपेक्षा समीचीना न–

***उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता।***
***समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च॥***
***(शिशुपालवध 12/10)***

यदि वयं मित्रयुधिष्ठिरस्य राजसूययज्ञं न गच्छामः स्वशत्रोः दमनं करिष्यामः तदा संसारः अस्मान् स्वार्थपरायणाः इति कथयिष्यति। यद्यपि चेदिराजस्योपरि आक्रमणं वयं स्वार्थवशात् न कर्तुमिच्छामः, सः दुर्नीतिसम्पन्नो भूत्वा लोकानां दुःखस्य कारणमभवत्। अतएव तस्य दमनमावश्यकम्। सम्प्रति राजनीत्याः उपरि वयं यदा दृष्टिपातं कुर्मः तदा पश्चामः यत् कस्यापि विधायकस्य शासकवर्गेण सम्बद्धजनस्य चिन्ता नास्ति यत् कथं दुर्नीतिसम्पन्नाः जनाः समाजे अव्यवस्थां कुर्वन्ति, लोकान् पीड्यन्ति। स्वार्थवशात् सम्प्रति सर्वे राजनीतिज्ञाः शासकवर्गेण सम्बद्धाः जनाः असामाजिकजनान् पोषयन्ति, स्वार्थान्धाः भूत्वा राजनीतिं च कुर्वन्ति।

रानीतिशास्त्रस्य असाधारणपण्डितस्य उद्धवस्य विचारात् पूर्वं बलरामः स्वविचारेण श्रीकृष्णमवगतं कारितवान्। उद्धवस्य कृते 'वातव्याधिः' इति नाम प्रयुक्तः अस्ति। स्वयं माघः अपि शिशुपालवधस्य द्वितीयसर्गे उद्धवस्य कृते 'पवनव्याधि' इति नाम प्रयुक्तवान्–

**विवक्षितामर्थविदस्तत्क्षणप्रतिसंहृताम्।**
**प्रापयन् पवनव्याधेर्गिरमुत्तरपक्षताम्।**
**(शिशुपालवध 2.15)**

अत्र इदं बोधनमावश्यकं यत् कविमाघेन वर्णितं षड्गुणानां, त्रिविधसिद्धीनां त्रिविधोदयानां च वर्णनं विस्तृतरूपेण मनुस्मृतयां1 कौटिल्यार्थशास्त्रादिषु प्राप्यते। षड्गुणेषु गजाश्वध्‍ानादीनां प्रबनधेन कल्याणर्थं परस्परेषु यतः मेलनं तं 'यान' इति। शत्रुं परिधिं कृत्वा धैर्यभावेन प्रतीक्षा अस्ति 'आसनमिति'। भञ्जनं

स्फोटनं च 'द्वैधीभावः' इति तथा बलवतः आश्रयोऽस्ति 'संश्रयः' इति। यद्यतः पराक्रमबलं उत्साहशक्तिः' इत्युच्यते। वृद्धिक्षयस्थानानि त्रिन्यायेनोदया इत्युच्यन्ते। अत्र इदं ज्ञानमावश्यकं यत् कविः पंचांग–मन्त्रणायाः यां चर्चा कृतवान् तस्य विस्तरेण वर्णनं कौटिल्यः अर्थशास्त्रस्य सप्तमाधिकरणस्य एकादशाध्याये कृतवानस्ति। पंचाग–मन्त्रणायाः स्वरूपमेवमस्ति–

• 'कमर्णः आरम्भोपायः अर्थात् खातं, प्रकारः दुर्गः इत्यादीनां निर्माणकार्यं राजा कुर्यात् पुनः तेषां पुनर्निमाणमपि कुर्यात्।

•'पुरूष–द्रव्य–सम्पत्' अर्थात् राजा स्वराष्ट्रे दुर्गसेतु इत्यादीनां निर्माणे निपुणानां शिल्पीत्यादीनां विषये विचारं कुर्यात्।

•''पुरुष–द्रव्य–सम्पत्' अर्थात् राजा स्वराष्ट्रे दुर्गसेतु इत्यादीनां निर्माणे निपुणानां शिल्पीत्यादीनां विषये विचारं कुर्यात्। सेनायाः कृते ये विषयाः आवश्यकाः सन्ति तेषां ध्यानं कुर्यात् स्वराष्ट्रस्य परराष्ट्रस्य पुरुषसम्पत्, द्रव्य–सम्पत् द्वयोः मध्ये तुलनां कृत्वा न्यूनाधिकस्य विचारं कुर्यात्।

•'देव–काल–विभागः' अर्थात् दुर्गसेतुप्राकारेत्यादीनां निर्माणं राष्ट्रस्य कस्मिन् भागे भवेत्। राष्ट्रे इदानीं दुर्भिक्षः अस्ति सुभिक्षः वा इदं ज्ञात्वा तदनुकूलं कार्यं कुर्यात्। कं कार्यं कस्याम् ऋतौ कर्तुमुचितं भविष्यति। परराष्ट्रे कस्मिन् स्थाने किमस्ति? शत्रुराष्ट्रे कस्मिन् स्थाने किमस्ति? शत्रुणामुपरि कस्याम् ऋतौ आक्रमणमुचितं भविष्यति इत्यादीनां विचारं कुर्यात्।

•'विनिपात–प्रतिकारः' अर्थात् विघ्ननाशनोपायः। कार्यस्य प्रारम्भकरणे अनेक विघ्नाः आगच्छन्ति तेषां प्रतिकारस्य चिन्तनमावश्यकम्।

•'कार्यसिद्धिः' अर्थात् क्रियमाणानां कार्याणां फलप्राप्तिः।

एकेन राजनीतिज्ञेन मन्त्राणायाः एतेषां पंचांगानामुपरि विचारं कृत्वा कार्य' कर्त्तव्यम्। अत्र प्रश्नोऽस्ति यत् सम्प्रति अस्माकं राष्ट्रस्य शासनकर्तारः मन्त्रणायाः एतेषां पंचांगानामुपरि विचारं कृत्वा कार्य' कुर्वन्ति वा? उत्तरं निषेधात्मकमेव। राज्यस्व राष्ट्रस्व वा शासनकर्तृणाम् इदानीं चिन्ता नास्ति यत् तेषां राज्यस्य राष्ट्रस्य वा प्रतिभावन्त उद्यमिजनाः, चिकित्सकाः, अभियन्तारः परराज्ये परराष्ट्रे वा पलायनं कुर्वन्ति। अस्माकं कोट्यधिकानि धनानि स्ववित्तकोषे संगृहीतानि सन्ति तथा अस्माकं राष्ट्रम् ऋणे आमस्तकं निमज्जमानमस्ति। यदा वर्षतोः समाप्तिः भवति तदा राज्ये राष्ट्रे वा सर्वकारः वृक्षारोपणं कारयति, जलसंग्रणार्थं च विचारं करोति। मार्गनिर्माणस्य कार्यं नक्तं दिवा च भवति। अस्य परिणामं किं वयं सर्वे प्रतिदिनमनुभवामः।

यः शत्रु दण्डेन शान्तो भवति, तं प्रति सामभावस्य प्रयोगः व्यर्थः। अतः इदानीमावश्यकमस्ति शिशुपालस्योपरि आक्रमणं कृत्वा तस्य विनाशम्। इत्यस्य बलरामस्य विचारस्यान्ते श्रीकृष्णस्य संकेतं गृहीत्वा उद्धवः स्वमतं प्रकाशितवान्। सः उक्तवान् यत् विजिगीषु राजा पूर्वं स्वमन्त्रशक्तेः उत्साहशक्तेश्च सम्पादनाय विशेषरूपेण प्रयत्नं कुर्यात्, यतः इमे शक्ति विजिगीषुराज्ञः मूले स्तः। विजिगीषुराजा विलक्षणः पुरुषो भवति। बुद्धिः एव तस्य शस्त्रम्, आमात्यादि तस्य अंगम्, मन्त्रगुप्तिः एव तस्य कवचं, चारः एव तस्य नेत्रं तथा दूतः अस्ति तस्य मुखमेव। इदानीं बलरामः यः उक्तवान्–यत् दण्डसाध्यशत्रुणा सह 'साम' इत्यस्त्र प्रयोगः व्यर्थः तत्र मम कथनमस्ति, यत् विजिगीषुराजानं सर्वदा न तु क्षात्रतेजसः क्षमायाः अवलम्बनं वा करणीयम्। अनुकूलं समयं दृष्ट्वा कदापि क्षमायाः अवलम्बनमुचितं भवति। यथा रसज्ञकविः अनुकूलरसस्य अवलम्बनं करोति। शत्रुभ्यः तिरस्कृतः विजिगीषु अनुकूलसमयं दृष्ट्वा असाध्यव्याधीनामिव प्रकोपं करोति–'कृतापचारोऽपि परैरनाविष्कृतविक्रियः।

असाध्यः कुरुते कोपं प्राप्ते काले गदो यथा। (शिशुपालवध 2.84) यः विजिगीषु राजा स्वमण्डलस्य तथा परमण्डलस्य सम्पूर्णज्ञानेन राजमण्डलेषु स्वप्रभावं स्थापयति, स एव विजिगीषु राजा अनायासेन शत्रुं विनाशयति। विजिगीषुः, अरिः, मध्यमः, उदासीनश्च इमे चत्वारः राजमण्डलस्य मूलप्रकृतयः कथ्यन्ते। मित्रं, मित्रमित्रम्, अरिमित्रम्, अरिमित्रमित्रं च इमे चत्वारः तथा पार्ष्णिग्राहः (शत्रोः मित्रं भवति विजिगीषोः पृष्ठात् च आक्रमणं करोति), आक्रन्दः (अयं विजिगीषोः मित्रं भवति तथा पार्ष्णिग्राहोपरि पृष्ठात् आक्रमएणं करोति), पार्ष्णिग्राहासारः (विजिगीषोः शत्रोः मित्रस्य मित्रं भवति तथा पार्ष्णिग्राहासार सहायतां करोति, अतः इमं पार्ष्णिग्राहस्य इति कथ्यते), आक्रन्दासारः (विजिगीषो मित्रस्य मित्रं भवति) इमे चत्वारः सर्वान् मिलित्वा द्वादशराजमण्डल2 इति कथ्यते। वर्तमानसमयेऽपि द्वादशराजमण्डलस्य एतादृशं स्वरूपमस्ति पुनः भविष्येऽपि अस्य स्वरूपमेतादृशमेव भविष्यति। कालभेदाद् वस्तुस्वभावः न परिवर्तयति।) यः स्वकीया तिस्रः शक्तिः ज्ञात्वा (मन्त्रशक्तिः, प्रभुशक्तिः उत्साहशक्तिश्च) संधिविग्रहादि षड्गुणरूपरसायनस्य प्रयोगं करोति तस्य क्षयमनिवार्यम्। मम विचारेषु चेदिराजानं तुच्छशत्रुं मत्वा अवज्ञा समुचिता नास्ति। यथा राजयक्ष्मा व्याधिभिः सह सम्बद्धो भवति तथैव अयं शिशुपालोऽपि अस्माकं अनेकैः शत्रुभिः सम्बद्धः। यदि इदानीं युद्धार्थं वयं सर्वान् भूभृतान् स्वपक्षे करिष्यामः तथा अस्माकं मित्रस्य महाराजयुधिष्ठिरस्य यज्ञः पंगुः भविष्यति। या व्यक्तिः अस्माकं सहायतया यज्ञकार्यं कर्तुमिच्छति यदि तस्याः कार्येषु अस्माभिः विघ्नं भवेत् इदं तु अनर्थकम्। युधिष्ठिरेण सह प्रतिकूलं व्यवहारं कृत्वा वयं स्वमित्रतायाः रक्षणं कर्तुं समर्थाः न भविष्यामः। शत्रुराज्यसमूहे ये अष्टादशतीर्थाः सन्ति तेषु कुशलान् गुप्तचरान् नियुज्य शत्रुरूपजलराशीनां तलस्य ज्ञानमावश्यकम्। (भारतीयदण्डनीतिशास्त्रे राष्ट्रस्य अष्टादश पदाधिकारिणः 'तीर्थाः'3) इति कथ्यन्ते–

1. प्रधानमंत्री, 2. पुरोहितः, 3. युवराजः, 4. सेनापतिः,
5. दौवारिकः, 6. अनतःपुराधिकृतः, 7. कारागाराध्यक्षः,
8. धनाध्यक्षः, 9. कार्यनियोजकः, 10.प्राड्विवाकः (न्यायाधीशादिः, न्यायालस्य विचारकः),11. सेनां मासिकदायकः,12. नगराध्यक्षः, 13. कर्मान्तिकः, 14. राज्यसीमापालः,15. दुर्गपालः,16.राष्ट्रपालः, 17.दण्डपालः,18. धर्माध्यक्षः।

यदि इदानीं वयं शिशुपालस्योपरि आक्रमणं करिष्यामः तदा अस्माकं मित्रस्य महाराजयुधिष्ठिरस्य राजसूययज्ञः पंगु भविष्यामि। अस्माकं मित्रस्य राजसूययज्ञस्य समाप्तिः निर्विघ्नं भूयात् इति अस्माकमुपरि निर्भरास्ति। अतः गुप्तपुरूषैः वयं स्वमित्रपक्षीयराज्ञः विशेषरूपेण सूचयिष्यामः यत् ते

महाराजयुधिष्ठिरस्य यज्ञदर्शनस्य व्याजेन स्व–स्व चतुराङ्गिणीं सेनां नीत्वैव इन्द्रप्रस्थमागच्छन्तु। यज्ञभूमौ श्रीकृष्णं प्रति महाराजयुधिष्ठिरस्य अतिशयभक्तिं दृष्ट्वा अस्माकं शत्रुपक्षीयराजवृन्दः विचलितः भविष्यति। अयमेव कलहस्य प्रथमं कारणं भविष्यन्ति। शत्रुपक्षे ये अस्मान् जानन्ति ते शत्रुपक्षेण परिपुष्टाः भूत्वाऽपि अस्माकं पक्षे एव सहयोगं करिष्यन्ति। यथा काककुलात् प्रतिपालितोऽपि कोकिलः ज्ञानं भूत्वैव अचिरेण काककुलं त्यजति। एवं प्रकारेण विशीर्णपक्षबलो शत्रुवर्गः स्वचांचल्यदोषेण श्रीकृष्णस्य क्रोधाग्नौ पतङ्गाः इव समाप्तो भष्यिन्ति। श्रीकृष्णस्यापि इयमेव इच्छाऽऽसीत् यस्याः अनुमोदनमुद्धवः स्वविचारेण कृतवान्। मंत्रिणः उद्धवस्य इमां नीतियुक्तवाणीं श्रुत्वा श्रीकृष्णोऽपि तदनुसारेण कार्यं कर्तुं स्वसहमतिं दत्तवान्।

सम्प्रतिराजनीतिः विद्वत्समाजस्य विषयः नास्ति। पुनः राजनीतिक्षेत्रे विद्वान्सः गन्तुमपि न इच्छन्ति। इदानीं राजनीतिं कुर्वन्ति प्रायः असामाजिकतत्त्वानि। फलतः विद्वान्सः सर्वसाधारणजनाश्च राजनीत्याः आलोचनां कुर्वन्तः तम् असत् कार्यं वदन्ति। वस्तुतः राजनीत्याः अर्थः अपि संकुचितः जातः। अद्यत्वे राजनीत्याः अर्थः अभवत् प्रतिद्वन्द्वीदलानां अभिमर्दनमात्रम्। अस्माकं नेतृणां स्वार्थान्ध व्यवहारस्य परिणामः अस्ति भारतीयजनतायाः दुर्गतिः। यावत् पर्यन्तं भारतस्य सामान्यजनाः राजनीतिशास्त्रस्य आलोचनां न करिष्यन्ति, तावत् पर्यन्तं राष्ट्रस्य समृद्धिः न भविष्यति। पुरुषार्थचतुष्ट्यं राजधर्मस्याधीनं भवति। अस्मिन् राजधर्मे यदि शिथिलता भवति, तदा सर्वाणि लोककल्याणकारिकर्माणि संस्थानाति च नष्टाः भवन्ति। राजनीत्याः उपेक्षायाः परिणामः यत् अस्माकम् इयं शोचनीया दशा अभवत्।

## संदर्भ ग्रंथ

1. संधि च विग्रहं चैव यानमासनमेव। द्वैधीभावं संश्रयं च षड्गुणाञ्चिन्तयेत्सदा। मनुस्मृति– 7/160, 2. मनुस्मृति–2/156 3. प्राचीन भारत की दण्डनीति–डॉ. योगेन्द्र नाथ,– पृ. 35,